नं० १२८ ग-१

धर्मशास्त्रदायभाग १०

१-१५-२००१- नं०२०६

नं० १२८

पत्र ७

ॐ श्रीगणेशाय नमः मन्वादिवाक्यान्यविमृश्य येषां यस्मिन्विवादो बहुधाबुधानां तेषां प्र
बोधाय स दायभागो निरूप्यते यः सुधियः प्रमोदं १ अथ दायभागो निरूप्यते तत्र नारदः
विभागोर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते दायभाग इति प्रोक्तं तद्विवादपदं बुधैः पितृतआगतं
पित्र्यं तच्च पितृमरणोपजातस्वत्वमुच्यते पित्र्यस्येति पुत्रैरिति च द्वयमपि संबंधिमात्रोपलक्ष
णं संबंधमात्रेण संबंधिभावे धनविभागेपि दायभागपदप्रयोगात् अत एव दायभागं वि
वादपदमुपक्रम्य नारदेन मात्रादिधनविभागमप्युपदर्शितवान् तथा मनुरपि पित्र्यादि प
दमुक्त्वैव एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः आपद्यपत्यप्राप्तिश्च दायभागं नि
बोधतेत्युपक्रम्य समस्तसंबंधिधनविभागमुक्तवान् दीयत इति व्युत्पत्त्या च दायश
ब्दे दातिषदप्रयोगमधुराणाः मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वापत्तिफलसा
म्यात् तत्पुत्रादी ततद्यागोस्ति तत्र पूर्वद्रव्यस्वामिसंबंधादेव तत्स्वाम्यु
परमे पत्रद्रव्ये स्वत्वं तत्र निरूढो दायशब्दः ननु किं दायस्य विभागो विभक्तकाव्यवत्वं
यत्र दायेन सह विभागो संयुक्तत्व नेतावदस्वं दायस्य विनाशापत्तेः नापि द्वितीयः
संयुक्तोपि तन्मम दीप्ति भक्तं स्वं चाभ्युदिदमिति प्रयोगात् न च संबंधाविशेषात् स
र्वेषां सर्वधनेषु स्वत्वं तस्य द्रव्यविशेषे व्यवस्थापनं विभाग इति वाच्यं संबंध
मात्रसद्भावप्रतिपदस्य संबंधस्यावयवे वैव विभागजन्यत्वाभावादत्वात् द्रव्यक
नगमस्वत्वोत्पादविनाशकल्पनागौरवात् यथेष्टविनियोगफलाभावेनाऽनु
योगाच्च उच्यते एकदेशोपात्तस्येव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमना

प्रमाणाभावेन तद्वैशेषिकव्यवहारो न हि तत्र यत्नव्यवस्थितस्य प्रतिकारापत्तादिन स्व
त्वव्यंजनं विभागः विशेषेण भजनं स्वत्वज्ञापनं वा विभागः यत्रापि पैतृकं दासीगवा
दिकं बहूनां साधारणं तत्रापि तत्तत्कालविशेषवत्त्वदोहनादिफलेन स्वत्वं व्यज्यते तदा
ब्रुहस्पतिः एकां स्त्रीं कारयेत्कर्म यथांशेन गृहे गृहे उद्धृत्य कूपवाप्यं भक्तव्यं
सुरेशाग्र्यहैते युक्त्या विभजनीयं तदन्यथानर्थकं भवेदिदं श्लोकार्द्धद्वयं नानास्या
नेऽप्यनन्तु सकर्मकं न तु पितर्यूर्द्ध्वं गते पुत्रा विभजेयुर्धनं पितुरिति नारदवचनात्
पितुर्द्धनं विभजेयुरित्यन्वयात् विभागात् पूर्वं पुत्राणां न तत्स्वत्वं न च विभागस्य स्व
त्वकारणता न स्वसंबंधिधनेऽप्यतिप्रसंगात् उच्यते पित्रादिनिधनोत्तरमेवास्म
दीयमिति प्रयोगात् एकपुत्रो विभागं विनैव स्वत्वस्वीकारं तु संबंधिनि धनमेवा
स्त्वत्कारणं न्यूनतो नानातिप्रसंगः न च पितृर्जितव्यापारो ऽर्जनं स्वर्जुना धीनस्वामि
भावश्चार्जितोत्तिनाद्युत्पत्तियोजनमेवार्जनं युक्तं न तु जीवत्येव पितरि पुत्राणां
न स्वत्वं न कृत्तारित्यतात् युक्त एवोक्तं किं तु न्नैः यथा पित्र्यं धने नैतत मन्वादि
विरोधात् यथा मनुः ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समं भजेरन्पैतृकं रि
क्थमनीशास्ते हि जीवतोः जीवतो रपि पुत्राणां कृत्तो नाविभागः इत्यापस्तंबकात्यामि
दमुक्तं तदानीमस्वामित्वादिति न च भार्या पुत्र पत्न्योस्त्यादिवदस्वातंत्र्याभिप्राय
मिति वाच्यं तदानीं स्वत्वे प्रमाणाभावात् भार्यादिषु तु यत्नेन समाधिगच्छन्तीत्यर्द्ध
पंनी नि स्वत्वे सिद्धे उक्तं यत्नस्वातंत्र्यवर्जितं किंच स्वोपार्जितो पित्रो वां स्वामित्वे स्वयंव

ध.श. साध्यवैदिककर्मोच्छेदात् श्रुतिविरोधः स्यात् देवलेनापि पितृधने पुत्राणां स्वाम्यमेव द-
२ र्शयति तस्मात् पितर्युपरते पुत्रा विभजेयुर्धनं पितुः अस्वाम्यं हि भवेदेषां निर्दो-
षे पितरि स्थिते किंच जीवत्यपि पितरि पितृधने पुत्राणां स्वामित्वे पितुरिच्छ-
यापि विभागः स्यात् न जन्मैकस्वत्वकारणमिति प्रमाणाभावाच्च अर्जनादिरूपत्वाज्ज-
न्मनः स्वत्वावगमात् क्वचिज्जन्मैव निवृत्तजन्मनिबन्धनत्वात् पितृपुत्रसं-
बन्धस्य पितृमरणस्यैव स्वत्वकारणत्वात् परंपरया वर्णितं अन्यव्यापारेणा-
न्यस्य स्वत्वमविरुद्धं शास्त्रमूलत्वादस्यार्थस्य दृष्टं च लोकेऽपि दाने हि चेतनोद्दे-
शाविधिः स्वत्यागादेव दातृव्यापारात् संप्रदानस्य द्रव्ये स्वामित्वं न च स्वीकारा-
त्स्वत्वं स्वीकर्तरि वदान्यत्वापत्तेः परस्वत्वापत्तिफलेन हि दानक्रियात्वात् न च फलं सं-
प्रदाता यतं यथा हि देवतोद्देशेन द्रव्यत्यागं कुर्वन्नपि यजमानो न होता किंतु
तस्यैव त्यागस्य होमाग्निपातननिमित्तं प्रक्षेपं कुर्वन् ऋत्विक् एव होतेत्युच्यते त-
द्वदत्रापि स्यात् किंच मनसा पात्रमुद्दिश्येत्यादिशास्त्रे स्वीकारात् प्रागेव दानं प्रदर्श-
यं ननु ग्रहणं स्वीकारः अन्यतस्तद्भावित्वप्रयोगात् अर्थं स्वं कुर्वन् व्यापारः स्वीकारो
भवति कथं ततः प्रागेव स्वत्वं उच्यते उत्पन्नमपि स्वत्वं संप्रदानव्यापारेण समवेदनि-
तिना नैव व्यवहारार्हं क्रियत इति स्वीकारशब्दार्थः याजनाध्यापनसाहचर्याच्च प्रत-
तिग्रहस्य स्वत्वव्यञ्जनत्वादर्जनरूपतया नाविरुद्धं याजनादौ दक्षिणादानादेव स्व-
त्वात् पितृनिधनकाले निंदा जीवनमेव अर्थस्यार्जनं भविष्यति किंच भ्रात्रादिध राम २

नेनन्मरणात् तन्मरणाकालीनजीवनाभावात् तत्पदैः स्वत्वमकामेनापि वाच्यं ध्रुवं तत्
ऊर्द्ध्वं पितृषष्ठ्यादितत्कालीनस्वत्वज्ञापनार्थं तदानीमेव द्रव्येषु रागप्राप्तं विभागमनु
वदति प्राप्ते तद्विधानानुपपत्तेः नचात्र नियमः संभवति एवं सत्स्वस्वेच्छया वा एकस्य
धर्मकामप्रवृत्ति मन्वाद्युक्तेः दृष्टार्थत्वाच्च विभागस्य न तत्र नियमः कालानियमो
वा संभवति किंच पितर्युपरत इत्यनंतरकाल एव विभागः स्यात् न तदुत्तरकालादपि
ज्ञातिष्विव ज्ञातप्राणावियोगापत्तिसमनियमस्यात्र विरोधाभावात् पित्र्ये पुरा
नंतर्यस्यन्यावज्जीवपर्यन्तस्य स्वेच्छात एव प्राप्तत्वात् अतो जीवति पितरि रिक्थ
पितृपुत्राणां स्वाम्ये विभागनिषेधार्थं वचनं वाच्यं न चान्यथापि अस्वाम्यकत्वा
पत्तेः अतो जीवतोः पित्रोः न पुत्राणां स्वाम्यं नास्ति किंतु पतत्योत्तयोरिति ज्ञापनार्
र्थमिदं वचनं एकः शब्दः अपत्यार्थः अपर्थः न चोपरममात्रमेवाविवादितं
किंतु पतितत्वप्रव्रजितत्वाद्यपि ग्राह्यमिति स्वत्वविनाशहेतुसाम्यात् तथाहनार
दः मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च विनष्टे वाप्यशस्त्रे पितर्युपरतस्पृ
हे विनिवृत्तेरिति अप्रशस्तो गृहस्थाश्रमाद्वृत्ते यदा निवृत्ते वापि मरणादिति
पाठे तदा मरणान्निवृत्तो जीवति निविनष्टे इत्यस्य स्थाने स्पृहे इति पाठे तत् रम
णाकरं अत्रापि पुनरुपरतस्पृहत्वादिना द्वाराणां स्वत्वं पितृधने भवतीति ज्ञापनार्थ
त्वमेकः कालो विभागस्य आयाम्नो ऽनुष्ठिते प्राप्यत्वात् सिद्धत्वादनुवादस्य स्वामि
त्वप्राप्तेः एकस्यापि पितृधने स्वाम्यादेकेच्छयापि विभागप्राप्तेः समेत्येति साहि

ध-शा. नत्वंपल्लाज्ञमनूद्यते अन्याप्यासाहित्यबहुत्वस्याप्यवगतेर्द्वयोर्विभागोनस्यादेक
२ द्वयोर्विभागप्रतिपादकप्रमाणाभावात् नन्वपरतेपितरिज्येष्ठएव धनाधिका
रीनितरोयथाह ज्येष्ठएवतुगृह्णीयात्पित्र्यंधनमशेषतः शेषास्तमुपजीवेयु
र्यथैवपितरंतथा ज्येष्ठोऽत्रपुत्रमात्रकाद्यावर्तकोऽभिप्रेतोवतुजीवदपेक्षः
मनुः ज्येष्ठेनजातमात्रेणपुत्री भवतिमानवः पितॄणामनृणश्चैव सतस्मात्
सर्वमर्हति यस्मिन्नृणंसंनयतियेनचानंत्यमश्नुते सएवधर्मजःपुत्रःकाम
जानितरान्विदुः नैतत् सर्वेषांजीतज्येष्ठाधिकारस्मृतेः यथानारदः विभक्ता
व्यक्तःसर्वान्ज्येष्ठोभ्राताययापिता भ्रातायःशक्तःकनिष्ठोवाशक्त्यपेक्षाव कु
तास्थितेः सर्वेष्वपाकनिष्ठोपिशक्तःसनुविभजयादिति ज्येष्ठत्वचानंत्रं मनुः
एवंसहवसेयुर्वापृथग्वाधर्मकाम्यया पृथग्विवर्द्धतेधर्मस्तस्माद्धर्म्यापृथ
कु॰ क्क्रिया सहपृथग्वेतिपदाभ्यांचेष्टातोवैकालिकत्वंदर्शयति नेदृशंपितृ
स्वत्वापगमएकःकालः अपरस्मात्पगमनएवपितृस्वास्त्येपितरिष्टयेत्तिका
लद्वयं नपुनःपितर्युपरतइतिएकःकालः पितर्युपरतेस्पृहेमातृरप्यनिवृ
तेरजासिद्वयपरः यतिवृत्तेपिमातृरजसिपितासमस्पृहेतादित्ययतिका
लद्वयमादरगीयं मातृरजोनिवृत्तेःपितुपरतस्पृहत्वाविरोधरागात्वेद्विंश
द्वर्षोवहेत्कन्यां हृद्यांद्वादशवार्षिकीं त्र्यष्टवर्षोष्टवर्षांवाधर्मेसीदति
त्वरइतिमनुनाविवाहविधानात्तवनंपंचाशत्तोद्ध्रनोदित्याद्यमातरगम

नकालविधानात् तदा च रजोनिवृत्तेर्मातुः संभवेपि पितरि चोपरतस्पृहे बालाप्र
स्येपुत्राणामनिच्छतामप्यविभागप्रसंगात् निर्विशेषधनाभ्युपरतस्पृहत्वमेव वि
ता रे धनविभागकाल इति चेत् न अनुपरतस्पृहे पितरि पतितेप्यविभागप्रसंगात्
अयमपरः काल इत्यभिधाने कालबहुत्वापत्तिः पितुरुपरमः पतितत्वं नि
स्पृहत्वं इच्छा चेति यद्वकार्यद्विमे पितरि पुत्राणां विभागे स्वातंत्र्यमस्ति तदुक्तम्।
धर्मविभिन्नत्वेन न तथा व्यवहरति जीवति पितरि पुत्राणामर्थादानविसर्गाक्षेपे
न स्वातंत्र्यं कामं दाने प्रोषिते च मार्गे गते वा ज्येष्ठोऽर्थांश्चिंतयेत् स्वयमकामा
नः शंखलिखितौ अपि न अर्थशक्तौ कुटुंबव्यवहारान् ज्येष्ठः प्रतिकुर्यात् अनन्तरो
वा कार्यज्ञः तदनुमतौ वा नाकामे पितरि रिक्थविभागो विपरीतचेतसि दी वृद्धे
र्घरोगिणि वा ज्येष्ठ एव पितृवद्द्रव्याणि पालयेत् हारीतः रिक्थमूलं हि कुटुंबम
स्वतंत्राः पितृमंतो मातृमंतश्चैव भवास्थिताया: एतद्वचनद्वयं कार्यद्विमे दीर्घरो
गृह्णं= गिणि च पितरि विभागेतिधि ज्येष्ठ एव कुर्यात् तदनुज्ञो वा कार्यज्ञ इत्या
उपरतो न त्वकामे पितरि इत्येतदेव कार्यद्विमे पितरि रिक्थविभाग इति धारेश्वर
लिखितं तस्मात्पतितत्वनिस्पृहत्वोपरमैः स्वत्वापगम एकः कालः अपरश्च
२ सति स्वत्वे तदिच्छा इति कालद्वयमेव युक्तं मातुर्निवृत्ते रजसीति तु पितामहादि
धनविभागे निवृत्ते रजसि पुत्रान्तरसंभवाभावात् तदानीमपि पितरि इच्छयैव पुत्रा
णां विभागः अनिवृत्ते रजसि कृतभागत धनविभागे पश्चाज्जातानां वृत्तिलोपापत्तेः न चासौ युक्तः पश्चाज्जाताय पतितात्प्राप्यं च

पित्रादि धनविभाग० =१

ध॰शा॰ गर्भेव्यवस्थिताः वृत्तिलोपेपिहिकांदांति वृत्तिलोपेनविभजेतइतिवचनात् अतएवपितृध
४ नैकाल[illegible]य अतएवमनुगौतमादिभिर्धनपदंपरित्यज्य ऊर्ध्वंपितुरित्युक्तं ऊर्ध्वंपितुरि
ति पितृस्तदस्वत्वापगमान्तदर्थमेव ऊर्ध्वंमितिकृतिधानं अतोऽयमेकोविभागकालः
ऊर्ध्वंविभागाज्जातस्तुत्स्नमेवहरेद्धनमित्यनेनवसतएवहेपितरिजीवतिद्वितीयाविभाग
कालोऽपरोदर्शितः द्वास्तुभगिनीतीस्वुवेतितकालार्थे किंतुतासांस्वयंवयस्तता
र्थं यथायथञ्चैतद्विषयंपितृदायेभ्योदत्त्वांपैतृकंतत्नः ह्यन्तःभिस्ताहितन्मत्कन्यकायाः
नुरूपायप्यापिता इदंनारदवचनंपित्रागिशोधनाविशेषयेभावार्थंतिविभागकाला
र्थं अतस्माद्धनारदवचनादयमर्थः सिद्धाति यत्रविभागकर्ताभिस्तत्समर्पणानुमत्ये
रां वपित्राघटितविभागार्थं परिस्थितवाणोधनांवृशिष्ठधनविभागप्रतिपादनस्यैवकृता
=भजती स्ययोजनत्वात् अतएवमातृधनस्यापिद्रूपणवाशिष्टस्यैवविभागमाहयाज्ञ
वल्क्यः मातुर्दुहितरःशेषमृणात्ताभ्यऋतेऽन्वयः एतद्धिविभक्तेष्टाद्दानदिनैव
ताने यद्वादतास्तुभगिनीनीमातृधनंपुत्रैरेवाविभजनीयं अत्रदातारकन्याभिः
सहसाधारणा एतद्वाक्यसेवाच्यं एवंतावत्पितृधनविभागकालत्रयमुक्तं
संप्रतिपितामहादिधनविभागकालोऽभिधीयते अत्रबृहस्पतिः पित्रोरुत्तरगविभ्या
त्तरांविभागःसंप्रदर्शितः मातुर्निवृत्तेरजसिजीवतोरपिशस्यते नास्ययुक्तवतस्य
पितृधनगोचरत्वं ऊर्ध्वंविभागाज्जातस्तुपित्र्यमेवेत्यनेनतविषयत्वापत्तेः निवृत्तेरजसि
पुत्रोत्पत्त्यभावात् मातृधनविषयत्वंवानाशंकनीयं एवंमात्र्यदेवनिर्भूतत्वापत्तेः

जीवद्विभागेतुपिताग्रहीतांशद्वयंस्वयमितिवचनमातुरंश

[illegible] गृह्णात्युक्तेः पं॰ १

कस्मैचिदेत्यपेक्षायां ४ प. २ दत्ता

मतोतिक्रान्तोसावितिपैतामहद्रव्यविषयं नचैतदुभयमपि पितृरजोनिवृत्तौ विभाग
निमित्तं संभवति मातरि जीवति षयाविभागाभावात् तस्मात्तेषां मध्ये यः पैतृकः पुत्राः स्वयं
विभजेयुर्निवृत्ते रजसि मातरि जीवति चेच्छतीति गौतमवचनात् पितुरेवेच्छातः इति नि
रार्क्रियते अतः पित्रोरभाव इत्येकः कालः पितरि सतीति विवचनान्निर्देशात् सोदरस्या
त्सत्यां पित्र्यधनविभागोऽपि मातुरभाव एव धर्मः तत्कमातृधनविभागार्थं मातु
रभावस्योपादानं जीवतोरपीत्यादिशेषे तज्जीवतस्यापि पारतन्त्र्यकीर्तनात् ।
मातुरभावो मातृधने ब्रह्मचर्यः एतच्च विस्तरेण वक्ष्यते तस्मात्पैतामह
धनस्यापि पित्रोरभाव इत्येको विभागकालः तथा मातुर्निवृत्ते रजसि पितुरिच्छातः इत्यपरः
तत्र पितुरिच्छामात्रेणैव तस्य विभागः अनीशास्ते हि जीवतोः तथा च स्वाम्यं हि भवेदेवं
निर्देशे पितरि स्थिते तथा जीवति चेच्छतीति तया पितुरनुमत्या दायभागः तथा जीवति पितरि
रिक्थविभागोऽनुमतेः तदेवमादिमनुनारदगौतमबौधायनशंखलिखितादिभिरविशेषे
णजीवति पितरि पुत्राणां यावद्धन गोचरास्वामित्वस्य पितुरिच्छाधीनविभागस्य च प्रति
पादनात् पैतामहस्य च पुत्रपौत्रयोरधिकारस्याभिधानाच्च पैतामहधनगोचरत्वमपनीय तत्र पितृनुम
तिवचनानां यत्तु याज्ञवल्क्यवचनं भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा तत्र स्या
त्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः तस्य नित्यमपि विधायतेऽध्यातितत्त्वतोऽर्थः य
त्रपौत्रयोर्जीवत्पितृकयोरधिक्रमभागयोरेकः पुत्रमतस्त्याविलक्षणोऽन्यः अजीवति
तत्र पितामहस्य तदा पुत्रस्यैव तत्पुत्रं प्राप्नोतीत्यापत्तिसन्निकर्षात् तदर्थं सहदृशं [illegible]
स्वाम्यमि

दत्तकमीमा ४ प. ५

ध॰शा॰ तिवचनं यथा पैतामहे पितुः स्वाम्यं तथैव तस्मिन्मृते तत्पुत्राणामपि न तत्र सन्निकर्ष
५ विप्रकर्षाभ्यां कोपि विशेषः पार्वणविधिना पिंडदानेन द्वयोरपि तदुपकारकत्वाविशेषा
दित्यभिप्रायः अत एव मृतपितृकः प्रपौत्रोपि पुत्रपौत्राभ्यां सह तुल्यवदेवाधिकारी भवति
5 पिंडदानाविशेषात् जीवत्यपि पितरि पुत्राणां पितामहधनस्वामित्वे सपुत्राणामत्र भ्रातृव
यविभागेन तत्पुत्राणामपि विभागः स्यात् स्वामित्वाविशेषात् स्वाक्रांतत्वेनात्
दर्थत्वं वचनस्य अनेकपितृकाणामेव प्रक्रमात् निबंधः कार्त्तिकीं अकार्त्तिकीं इदं
दास्यामीति यन्निबंधं पूर्वं स्वत्वापर्य्यायादिपदमामिति यदयं वाधाते कथं पुरस्कृतो वच
नार्थः इत्यथाविभागदानप्रवृत्तस्य पितुः पितामहधने सदृशं स्वाम्यं प्रवृत्तेः सहजत्वात्
त्मोपार्जितधन इव न्यूनाधिकविभागमिच्छतः कर्तुमर्हतीति यथा विष्णुः पिता चे
त्पुत्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेर्थे पैतामहे त्वर्थे पितापुत्रयोस्तुल्यं स्वामित्वं इ
ति वचनं यदि पिता पुत्रान् विभजति तदा स्वोपात्ते न्यूनाधिकविभागं स्वेच्छया पुत्रेभ्यो
दद्यात् पैतामहे तु नैवं यस्मात्तुल्यं स्वामित्वं न पुनः पितुः स्वच्छंदवृत्तिता अतः पिता
पुत्रयोः पैतामहे सममविभागार्थं सदृशं स्वाम्यमिति वचनं पुत्राणां चाविभागस्वातं
त्र्यार्थमिति ध्येयमोपि हेयं एवमेवापरवचनमपि व्याख्येयं अतः पैतामहधनेपि
तदर्भोगाद्यं पितरि सत्येव चाविभागेन पुत्रे कुर्यादिति सिद्धं यच्च मनुर्विष्णु पैतृकं
तु पिता द्रव्यमनवाप्तं यदाप्नुयात् न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमार्जितं स्वा
र्जितत्वेन हेतुना नाकामो विभजेदिति वदंतौ स्वयमनर्जिते पैतृमहधने पितरि सति द्वि

याःपुत्राणांविभागःदर्शयतः तत्रापिविभागदानप्रवृत्तः पितापितामहधनंस्वार्जितं नाका
मोविभजेत् अन्यस्तुनरकामोविभजेदितिभ्रातमेद्धात्तएवेत्यर्थः नपुनःपुत्रेच्छयापिवि
भागंकारयतः मणिमुक्तादेरुनःपैतामहेनार्जितोपिस्वार्जितइवपितुरेवस्वाम्यंन्यूनाधि
कविभागदानार्हत्वं यथाहयाज्ञवल्क्यः मणिमुक्ताप्रवालानांसर्वस्यैवपिताप्रभुः स्था
वरस्यतुसर्वस्यनपितानपितामहः पितामहप्राप्तेस्तदृताविषयंवचनं मणिमुक्तायुपादाया
पुनःसर्वस्येत्युपादानात्सर्वेषांभृत्यादिव्यतिरिक्तानांदानादिष्वपिपितुःप्रभुत्वं नस्था
वं= वरादिधनद्रव्याणां अत्रापिसर्वस्येत्युपादानात् सर्वस्यकुटुंबवर्तनहेतोर्दानादितिषेधः
कुटुंबस्यावश्यंभरणीयत्वात् यथाहमनुः भरणंपोष्यवर्गस्यप्रशस्तंस्वर्गसाधनं नरकंपी
डनेचास्यतस्माद्यत्नेनतंभरेत् अल्पस्यतुवर्तनाविरोधिनोनदानादिनिषेधः सर्वस्ये
त्यनिर्थकापत्तेः स्थावरग्रहणान्निबंधद्विपदयोर्दंडापूपादिन्यायात्दानादिनिषेधसि
द्धिः यदिपुनःसर्वस्यस्थावरादिविक्रयमंतरेणकुटुंबवर्तनमेवनभवतितदासर्वस्यापिवि
क्रयदानादिकमित्यर्थात्सिद्धंति सर्वतएवात्मानंगोपायीतेतिवचनाच्च तथास्थाव
रस्यसमस्तस्यगोत्रसाधारणस्यच नैकःकुर्यात्क्रयंदानंपरस्परमतंविना विभक्ता
अविभक्तावासपिंडाःस्थावरेसमाः एकोह्यनीशःसर्वत्रदानाधमनविक्रये एतद्वा
सवचनद्वयेनएकस्यविक्रयाधनाधिकारइतिवाच्यं यथेयह्वितियोगार्हत्वलक्षणस्व
त्वतस्यद्रव्यांतरइवात्राप्यविरोधात् व्यासवचनंतुस्वामित्वेनकुर्वतःअस्वामेवरविक्रय
णेनकुटुंबविरोधात्चधर्मभागीत्वाज्ञापनार्थंतियेधरूपंनतुविक्रयाद्यनिष्पत्यर्थं।

ध॰ भा॰ एवं स्थावरं द्विपदं चैव यद्यपि स्वयमर्ज्जितं असंभूय सुतान् सर्वान् न दानं न च विक्रयः इत्येव
६ माद्विकमप्येवं वर्णनीयं तथाहि कर्त्तव्यपदमवश्यमत्राध्याहार्य्यं तेन दानविक्रयकर्त्तव्य
तानिषेधात् न त्वकरणात् विध्यतिक्रमो भवति न तु दानाद्यनिष्पत्तिः वचनशतेनापि वस्तु
नोऽन्यथाकरणाशक्तेः अत एव नारदः यद्येकजाता बहवः पृथक् धर्माः पृथक् क्रियाः
पृथक् कर्मगुणोपेता न चेत् कार्येषु संमताः स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि
वा कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै प्रकृतमनुसरामः तदेवमत्र पूर्वं येन पैता
महाद्धनेपि पितापुत्रयोः समविभागाविधानानुपपत्तेः पुत्राणां विभागस्वातन्त्र्यप्रतिपत्तेश्च
स्वाम्याभावाच्च जनकेच्छाधीनन्यूनाधिकविभागनिराकरणार्थं वा मृतपितृकस्य भ्रातृ
पुत्रस्य पितृव्येन सह तुल्याधिकारार्थं वा वचनं एवं पैतामहधनस्यापि पितुरिच्छयैव
भागः कार्यः किन्तु निवृत्ते रजसीति विशेषः स्वोपात्ते तु रजोनिवृत्तेर्मन्तरेणापि पि
तुरिच्छैवेत्युभयत्राप्यविशिष्टं तेन पैतामहेपि कालद्वयं तत्र यदापि जीवेन्नतः पुत्रान्
विभजेत्तदा पैतामहादपि धनाद्भागद्वयं स्वयं गृह्णीयात् जीवद्विभागे तु पिता गृह्णीतांश
द्वयं स्वयमिति बृहस्पतिना तथा द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेति नारदेन वा
विशेषेणाप्रतिपादनात् किंच इतोऽपि पितामहधनात्तु पितृभागद्वयं ज्येष्ठस्य विंशोद्धारः
सर्वद्रव्याच्च यद्वरं ततोऽर्द्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः तथा एवं समुद्धृतोद्धारे सा
मानंशान् प्रकल्पयेत् उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना एकाधिकं हरेज्ज्येष्ठः
पुत्रोऽध्यर्द्धं ततोऽनुजः अंशमंशं यवीयांस इति धर्मो व्यवस्थितः एतैर्मनुवचनैः सर्वद्रव्य

वरसहितविंशतितदर्द्धतत्तृतीयोद्धारादर्शिताः तथा एकांशाधिकार्द्धाधिक चतुर्थभागाधिक
भागाः प्रतिपादिताः गौतमेनापिविंशतिभागोज्येष्ठस्यमिथुनमुभयतोदद्युक्तोरथोगोवृषः
मिथुनमजादीनां ऋ मेषादियुक्तोरथः गोयुक्तोवृषः एतत्सर्वंज्येष्ठस्यतथाकाणखोरकूट
वंडामध्यमस्यानेकाश्चेत् खोरोवृषःकूटोवामनाकात्तीः वंडोविकृतलांगूलः एतेमध्यम
स्ययदिबहवःपशवोभवन्ति तथाविधान्यायसीगृहमनोयुक्तंचतुष्पदमेकैकंयवीयसः स
ममितरत्सर्वं मनुकिंचित्तयोर्यवीयसः एवांशहूंसर्वंसमंविभजेरन्निति प्रतिपादयन्नाशीवारुर्व
जः स्यादेकैकमितरेषामितिस्त्रेतरांशद्वयंज्येष्ठस्योक्तं नचोयाद्वुकित्वेनाप्युभयंज्येष्ठ
स्येतिवाच्यं उद्धारेनहृतेभागद्वयस्याभिधानात् ऋक्थैकत्वेवउद्धारस्यासंभवात् मध्यमक
नीयसोश्चोपार्ज्जकत्वेनज्येष्ठेनाप्यविशेषात्तयोरध्यर्द्धादिविधानानुपपत्तेः ज्येष्ठादिपद
नर्थकत्वाच्च अतएवपुत्रिकौरसयोः पितृधनविभागेमनुराह पुत्रिकायांकृतायांयदि पु
त्रोऽनुजायते समस्तत्रविभागः स्याज्ज्येष्ठतानास्तिहिस्त्रियाः इतिस्त्रीत्वेनज्येष्ठत्वाभाव
त्समभागतांप्रतिपादयनृत्तुरुषस्यभागद्वयंज्ञापयति यत्तूक्तंयथाहोलाकाधिकर
हो णीप्राच्यकर्तृकहोलाकानुष्ठानोपपत्तये होलाकाकर्त्तव्येति श्रुतिःकल्पिता तावतैव
तदुपपत्तेः नचप्राच्यादिपदवतीकल्पनागौरवात्तद्वदत्रापिऋक्थकौंऽशद्वयंगृह्णीयात्
इतिश्रुतिःकल्पनीया नपुनःपित्रादिपदवतीति तदयुक्तं तत्रप्राच्यकर्तृत्वानुष्ठान
स्याकस्यकल्पनीयसामान्यश्रुत्यैवोपपत्तेः नचाप्राच्यानामननुष्ठानेऽपर्थंप्राच्यपदवती
कल्पतामितिवाच्यं अननुष्ठानस्यानाचारस्यश्रुतिकल्पनानिमित्तत्वानुपपत्तेः एतत्म

ध.शा. मन्वादीनां ज्येष्ठपदप्रयोगान्नुपपत्त्यैव ज्येष्ठपदवत्त्याः पदशक्तिः कल्पनार्हत्वात् स्वर्त्तकप
७ दवत्याश्चावश्यकल्पनीयत्वाभावात् ज्येष्ठपदवत्याश्च स्वर्त्तकपदवत्त्याश्च कल्पनायां विशेषा
भावात् न चात्यन्ताज्ञर्जितस्य भागद्वयार्थं स्मृतेरवश्यकल्पनीयत्वादत्रापि सैव मूलमस्तु लाघवा
त् शेषं